National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 201-203
© 2025 NJHSR
www.sanskritarticle.com

**मनोरमा जेना**
विद्यावारिधिः शोधच्छात्रा,
न्यायविभागः,राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**मनोरमा जेना**
विद्यावारिधिः शोधच्छात्रा,
न्यायविभागः,राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, आन्ध्रप्रदेशः

# कन्दलीकारमते पदार्थानां साधर्म्यवैधर्म्यविवेचनम्

**मनोरमा जेना**

"पदस्यार्थः पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणम् लभ्यते[१]। प्रमिति-विषयाः पदार्थाः इति शिवादित्यः। अभिधातुं व्याख्यातुं योग्यः अभिधेयः, तस्य भावः अभिधेयत्वम्। "पदार्थ इत्यनेन पदसम्बन्धिअभिधाविषयत्वस्य लाभेऽपि पदसम्बन्धित्वांशस्य अव्यावर्तकत्वाद् अभिधेयत्वमात्रं पदार्थसामान्यलक्षणम्। अभिधा ईश्वरेच्छा, इदं पदमिमर्थं वोधयति, अस्मात् शब्दादयमर्थो वोद्धव्य इति ईश्वरेच्छा संकेतरूपा शक्तिः। अत्र शक्ति निरूपितपदनिष्ठविशेष्यतायः परम्परया निरूपिता या विषयत्वसम्बन्धावच्छिन्नप्रकारता, तदा-श्रयत्वं पदार्थत्वमित्यर्थः। यः स्वार्थसाधकः स पदार्थः" इति सामान्यलक्षणं न्यायवैशेषिक-दर्शने स्वीक्रियते। अत्र किरणावल्यां "स्वार्थसाधनयोग्यं यदस्तीति प्रतीतेः विषयः सः पदार्थः"। अभिधेयवस्तुमात्रस्यैव पदार्थत्वम्[२] इति कौमुद्याम्। वैशेषिकाः 'पदार्थवादिनः' इति विद्वांसः प्रतिपादयन्ति। वैशोषकदर्शने पदार्थस्य यत् तत्वं निरूपितं तत्तत्वं दर्शनान्तरेषु दुर्लभम् इति निश्चयेन वक्तुं शक्यते। एतेषां नये पदार्थानां तत्वज्ञानादेव निःश्रेयस अधिगम्यते। प्रशस्तपादाचार्यण पदार्थानां तत्त्वज्ञानं निःश्रेयसः कारणरूपेण प्रतिपाद्योक्तं च तदीयभाष्ये- "द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां षण्णां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्वज्ञानं निःश्रेयसेहेतुः। तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेव"[३]। अनेन द्रव्यादीनां षण्णां पदार्थानां साधर्म्यवैधम्ययोः यथार्थज्ञानं मोक्षाधिगमस्य हेतुरूपेण उपपादितम्। किन्तु अभावाक्ष्यपदार्थः शास्त्रकारैः तत्र तत्र प्रतिपादित एव। अतएव 'भाभावः तमः' इत्यादिषु अभावः सूत्रकारेण उक्तः। ननु एवं सति किमर्थम् अभाव अत्र उद्देश्य न निरूपित ? अतएव निःश्रेयस्य आत्यन्तिकदुःखनिवृत्तिरूपत्वम् आहुः। वस्तुतः 'अभावः' पृथक् पदार्थत्वेन स्वीकृतोऽपि पदार्थानां मध्ये न उल्लेखितः इत्यतः तस्य अप्रधानमेव विवक्षित इति प्रतीतिः संजायते। अतः उदयनाचार्येण किरणावल्यां सुस्पष्टमेवोक्तम्- "अभावस्तु स्वरूपवानपि पृथङ्नोद्दिष्टः प्रतियोगिनिरूपणाधिननिरूपणत्वात् न तु तुच्छत्वात्" इति।

एतेन येषां निरूपणे प्रतियोगिनो निरूपणम् आपेक्षिकं तेषाम् उद्देश प्रकरणे नोक्तम्। तेषाम् उद्देशः प्रतियोगिनिरूपणावसरे साधयिष्यते। तथाहि- 'अभाव' पदार्थः 'अपवर्ग' सापेक्षात् तस्य निरूपणावसरे अभावेऽपि साधयिष्यते इत्यर्थः। वैशेषिकनये द्रव्यादिषु सप्तपदार्थेषु न्यायदर्शनस्वीकृतानां षोडशपदार्थानामन्तर्भावः जायते।

वैशेषिके द्रव्यगुणकर्मसामान्यविशेषसमवायानां षड्विधभावपदार्थानां साधर्म्यवैध-र्म्याभ्यां तत्त्वज्ञानं मोक्षकारणम्। अत्र समानो धर्म येषां ते सर्धमाणः तेषां भाव साधर्म्यम्। विरुद्धो धर्मं येषां ते विधर्माणः तेषां भाव वैधर्म्यम् इति। षणानां पदार्थानां धर्मः षड्भ्योः नातिरिच्यते। तथापि तयेव पदार्थाः परस्पर संगतापन्नाः। अतएव धर्मिणः परस्परं विवेक-निमित्तं धर्मिणा उद्देश्यानन्तरं धर्माणां पृथक्त्वेन उपयोगः। एतस्मात् कारणात् धर्मीवत् धर्माणां पृथक्त्वेन निर्वचनस्यावश्यकता वर्त्तते। अनेनाभिप्रायेण आचार्यप्रशस्तपादेन षण्णानां पदार्थानां साधर्म्यमस्तित्वाभिधेयत्वज्ञेयत्वानि[४] इति ग्रन्थेन प्रतिपादितः। षण्णानाम् अपि इत्यत्र अपि इति पदेन पदस्य अभिव्याप्तिः इत्यर्थः। अत्र अस्तित्वं नाम विधिमुखप्रत्ययविषयत्वम्। कन्दलीकारमते अस्तित्वं नाम स्वरूपवत्वम्[५]।

तथा च प्रतियोगीनिरपेक्ष्यत्वेन निरूपणयोग्यता इति वक्तव्यम्। अभिधेयत्वं नाम अभिधानयोग्यम्। शब्देन सह अर्थस्य यः संगतिरूपसम्बन्धः तस्य नाम अभिधानयोग्यता। ज्ञेयत्वं च ज्ञानयोग्यत्वम्[६]। अत्र ज्ञानयोग्यता ज्ञाप्यज्ञापकभासम्बन्धरूपा। आश्रितत्वं नाम स्वभाविक आश्रयता। प्रशस्तपादाचार्येण पृथिव्यादिचर्तुविध द्रव्याणां परमाणुरूपम् आकाशकालदिगात्मनाम् अतिरिक्त सकलभावपदार्थानां साधर्म्यम्। स्वभाविकाश्रयत्वं नित्यद्रव्ये नास्ति। अतएव भाष्यकारेण अन्यत्र नित्यद्रव्यभ्यः इति प्रयोगः कुतः। मुक्तावली-कारेण समवायादिसम्बन्धावच्छिन्न वृत्तित्वम् आश्रितत्त्व-मिति प्रतिपादितम्। अत्र वृत्तित्वं सर्वाधारताप्रयोजकसम्बन्धाभिन्न सम्बन्धेन तिष्ठति। सर्वाधारताप्रयोजकसम्बन्धः कालिकविशेषण-ताख्य सम्बन्धः, कालिकेन नित्यानां कालादौ वृत्तित्वात्। एवं च सर्वाधारता-प्रयोजकसम्बन्धः दिग्विशेषणतारख्यापि नित्यानां द्रव्या-णामपि। दिगविशेषतया महादिशि-वर्त्तमानत्वात्। तथा च सर्वाधारताप्रयोजकसम्बन्धाभिन्न सम्बन्धेन वृत्तित्वम्। केचित् च अनित्यद्रव्याणि समवायेन संयोगेन वा द्रव्यषु वर्त्तते इति वदन्ति। गुणकर्मसामान्यविशेषाः अपि समवायेन वर्त्तन्ते। समावायो अपि समवायात्मक स्वरूपसम्बन्धेन वर्त्तते। अभावोऽपि स्वरूपसम्बन्धेन वर्त्तते। अत एव समवायेन वृत्तित्वनिवेशनैव द्रव्याणां निर्वाहः संभवे। संयोगेन निवेशः अनतिप्रयोजकः भवति। अत एव समवाय-सम्बन्धावच्छिन्नवृत्तित्व स्वरूपा-सम्बन्धावच्छिन्न वृत्तित्वैतदन्य तरवत्व नैव साधर्म्यमिति वक्तव्यम्। भाष्योक्त आश्रितत्वं च इत्यत्र चकारं मूर्तद्रव्यातिरिक्त क्रियाशून्यत्वं साधर्म्यम् इति प्रतिपादयति। द्रव्यादिनापञ्चानां अनेकत्वेन साधर्म्यम्। सूक्तौ द्रव्यादिनापञ्चानां समवायित्वं समवायप्रतियोगीत्वं समवेतवृत्ति-भाव विभाजकधर्मवत्वं समवायावृत्ति धर्मवदाभावत्वं वा साधर्म्यम्। द्रव्यं विहाय गुणकर्म-सामान्यविशेषसमवायानां निर्गुणत्वेन निष्क्रियत्वेन च साधर्म्यम्। अत्र निर्गुणत्वं नाम गुणा-भाव विशिष्टत्वम्। निष्क्रियत्वं च क्रियाभावविशिष्टत्वं च क्रियायः असमवायत्वम् वा। निर्गता गुणा येभ्यः ते निर्गुणाः, तेषां भाव निर्गुणत्वं गुणाभावः। अत्र गुणाभावः गुणात्यन्ताभाव इति प्रकाशकारः। मकरन्दकारस्तु गुणाभावः नाम गुणात्यन्ताभाव। गुणात्यन्ताभावस्तु गुणसामान्याभाव इति प्रतिपादितः। तथा च गुणत्वावच्छिन्न समवायसम्बन्धावचिन्न प्रतियोगी-ताकभाव गुणाभावः। निष्क्रियत्वं च कर्मवदवृत्तिभाव-विभाजक उपाधिमत्वम्। अत्र भावविभाजकोपाधि नाम द्रव्यत्वं गुणत्वं क्रियात्वं सामान्यत्वं विशेषवत्वं समवायत्वम् च।

द्रव्यादिनां त्रयाणां सत्तासम्बन्धत्वेन सामान्यविशेषवत्वेन स्वसमयार्थ शब्दाभिधेयत्वेन धर्माधर्मकर्तृत्वेन च साधर्म्यम्। तथा च द्रव्यगुणकर्माणां समवायसम्बन्धेन सत्ता जातिमत्वं साधर्म्यम्। सामान्यविशेषस्वरूप द्रव्यात्वादि धर्मत्वं साधर्म्यम्। तथा च वैशेषिकशास्त्रोक्त संकेतित शब्दाभिधेयत्वं त्रयाणां साधर्म्यम्।

धर्माधर्मकतृत्वनमपि त्रयाणां चर्तुविधं साधर्म्यम्। प्रसङ्गेऽस्मिन् उदयनाचार्यः किं धर्माधिर्मकर्त्तृत्वं च इत्यत्र च कारेण धर्मकतृत्वंऔम अधर्मकतृत्वं चेति प्रयाणां साधर्म्स प्रतिपादितम्। गंन अधर्मपरितन्यधर्मकर्तृत्व तथा धर्मपरितेज्य अधर्मकर्तृत्वम् इति भाष्य-कारस्य तात्पर्यं प्रतिपन्नं भाति। कारणवान् पदार्थत्रयाणां कार्यत्वं तथा अनित्यत्वं साधर्म्यम्, तथा जन्यपदार्थे अनित्यतास्वीकारात् अणुपरिमाणमतिरिक्तकारणत्वेन द्रव्यगुणकर्मसामान्यविशेषसमवाया-भावानां काणत्वं साधर्म्यम्[७]। कस्यापि किञ्चित् धर्मावच्छिन्न कार्यस्य कार्यत्वावच्छिन्नस्य च कारणं अणुपरिमाण न भवति। अतः अणुपरिमाणे कारणत्वाख्यधर्मो न वर्त्तते, अणुपरिमाणस्य अतिन्द्रिय-त्वात्। अपि च परिमण्डल्यं अणुपरिमाणं तच्च परमाणुद्वेणुकसाधारण तादृश परमाणुद्वेणुकसाधारण अणुपरमाणुभिन्न सप्तपदार्थेषु कारणा-ताख्य समानधर्मः इति वक्तव्यम्। अत्रायमभावः अणुपरमाणु न कस्यापि कारणः। श्रीधरार्चामते परिमण्डल्यशब्दस्य अणुपरिमाण इत्यर्थः। भाष्योक्त पारिमाण्डल्यदित्यत्रादि-पदेन अणुपरिमाणं तथा द्वेणुकपरिमाणं महत्परिमाणम्। अन्त्यावयविपरिमाणम्, अन्त्यः शब्दः मन परिमाणम्, परत्वापरत्वम्, द्विपृथक्त्वं चेति न कारणमिति बोधयेम्। अन्त्या-वयविनि रूपरसगन्धस्पर्शपरिमाण द्वित्वसंख्या-द्विपृथकत्व-परत्वापरत्व विनश्यतावस्तद्रव्यं संयोग-विभाग-कर्म-अन्त्यशब्द-चरमसंस्कार-ज्ञानादीनां संग्रहः आदिपदेन भवतीति उदय-नाचार्यः।

सामान्यविशेषसमवायानां त्रयाणां स्वात्मसत्वं बुद्धिलक्षणत्वं अकार्यत्वं अकारणत्वं असामान्यविशेषवत्वं नित्यत्वं अर्थशब्दा-भिधेयत्वं चेति साधर्म्यम्। एतेषां त्रयाणां सामान्य-विशेषसमवायानां कारणानपेक्ष्यस्वभावत्वं वर्त्तते। एतेषां त्रयाणामपि समवायकारत्वा-भाववत्वं असमवायिकारणत्वभावात्वम् वर्त्तते इति हेतोः अकारणत्वमिति साधर्म्यम्। सामान्यविशेषरूप अपरजात्याभावः विशिष्टत्व एतेषां त्रयाणां स्वभावः विद्यते। सामान्यादौ यदि सामान्यं स्वीक्रियते तर्हि अनवस्थादोषः आपद्यत। अतः असामान्यत्वेन साधर्म्यम् ध्वंसः तथा प्रागभावस्य अपरयोगीत्वे त्रयाणां सामान्यविशेषसमवायानां नित्यत्वसाधर्म्यम्। वैशेषिकदर्शने त्रयाणां बुद्धिस्वरूपत्वे अर्थशब्देन वक्तुं नैव शक्यते। अतः स्वसंकेतितार्थ शब्दानभिधेयत्वं त्रयाणां साधर्म्यम्। समवायस्य निःसामान्यत्वम्। अतः समवायवृत्ति धर्मस्य जातित्वे एकवृत्तिव्यक्तित्वमेव वाधकम् इति मथुरानाथतर्कवागीशः[८]।

पृथिव्यादिनां नवानां द्रव्याणां द्रव्यत्त्वजातिमत्वेन स्वात्मनि आरम्भकत्वेन गुणवत्वेन कार्यकारणविरोधित्वेन अन्त्यविशेषवत्वेन च साधर्म्यमिति भाष्यवचनम्[९]। द्रव्यत्वजातिमत्वेन साधर्म्यं नाम द्रव्यत्वसामान्यवत्वेन साधर्म्यमिति। अत्र द्रव्यत्वजातिमत्वम् इति साधर्म्यम् द्रव्याणां गुणकर्मादिभ्यः पञ्चभ्यः पदार्थभ्यः पृथक्करोति अवयविद्रव्यातिरिक्तद्रव्याणाम् अनाश्रितत्त्वेन नित्यत्वेन च

साधर्म्यम्। नित्यत्वं नाम अनन्तत्वम्। यद्यपि नित्यत्वं ध्वंसाप्रतियोगीत्वमात्रपरत्वे ध्वंसे अतिव्याप्तम् तथापि ध्वंसप्रतियोग्यवृत्ति भावविभाजकोपाधिमत्वे तात्पर्यम्। पृथिव्याप्तेजवाय्वात्ममनसा अनेकत्वापर जातिमत्वे साधर्म्यम्। उत्पत्तिकालिन द्रव्यं क्षणं निर्गुणं निष्क्रियं च तिष्ठति इति नियमानुरोधेन क्रियावत्वं साधर्म्यम् अतिव्याप्तम् इति चेत् न, क्रियावत्वस्य क्रियावती द्रव्यत्वव्याप्य पृथिवीत्वजातेः अधिकरणतारूपस्वीकारात् उत्पन्ने विनष्टे च द्रव्ये पृथिवित्वजातेः नातिव्याप्तिः। तथा च मूर्तत्वे पृथिव्याप्तेजवायुमनसां वेगादिरहित उत्पन्नविनष्टेद्रव्ये मूर्तत्वादिमत्व रूपसाधर्म्यस्य जातिघटितलक्षणस्वीकारे नातिव्याप्तिः।

आकाशकालदिगात्मनां सर्वगतत्वं परममहत्वं सर्वसंयोगीसमानदेशत्वं च साधर्म्यम्। अत्र सर्वगतत्वं नाम सर्वमूर्तद्रव्यसंयोगित्वम्। परमूहुत्तं च जातिविशेषः। स च अपकर्षानाश्रय परिमाणवत्वम्। अपकर्षो अत्र जातिविशेषः। मूर्त्तावृत्तित्वं वा तदनाश्रयं महत्परिमाणं तत्त्वम्। सर्वसंयोगीसमानदेशत्वं नाम सम्पूर्णसंयोगिमूर्त्तद्रव्याणां संयोगेन आकाशादिदेश-समानमिति।

पृथिव्याप्तेजवाय्वाकाशानां पञ्चानां भूतत्वेन इन्द्रियप्रतियोगीत्वेन वाह्यकैकेन्द्रिय-विषयगुणवत्वेन साधर्म्यम्। तथा च पञ्चानां इन्द्रियप्रकृतित्वेन इन्द्रियोपदियत्वेन च साधर्म्यम्। एतादृशं साधर्म्यम् सूत्रावच्छिन्नमाकाश सूत्रानवच्छिन्नश्चाकाशमिति द्विविधं स्वीकृत्य स्वातन्त्रयुक्ताकाशे इन्द्रियप्रकृतिरूप साधर्म्यम् ग्राह्य इति श्रीधराचार्यः।

पृथिव्याप्तेजवायुनां चतुर्णां द्रव्यारम्भकत्वेन स्पर्शगुणादिकत्वेन च साधर्म्यम्[१०]। अत्र द्रव्यारम्भकत्व नाम द्वेणुकत्रेणुकादिक्रमेण द्रव्यारम्भणम्, पृथिव्यादि चतुर्णां कार्यरूपत्वात्। स्पर्शवत्त्वं च स्पर्शाधिकरणत्वम्। स्पर्शः चर्तुर्विधः शीतोष्णानुष्णाशीतस्पर्शभेदात् जलं शीतलम्। वर्णैः उष्णः। अनुष्णाशी स्पर्शस्तु पृथिवीवृत्तिः वायुवृत्ति च, अतएव पृथिव्यादि-चर्तुविध द्रव्यवृत्तिः अनुष्णादि त्रिविधः स्पर्शः। पृथिव्याप्तेजसां त्रयाणां प्रत्यक्षत्वं रूपवत्वं द्रव्यत्वावत्वं च साधर्म्यम्। पृथिवी तदा जलयोः गुरुत्वगुणाधिकरणत्वं रसाधिकरणत्वं च साधर्म्यम्। गुरुत्वस्य पृथिवीजलवृत्तित्वात् रसस्य च पृथिवीजलवृत्तित्वात्। पञ्चमहाभूतसहकृतात्मनां विशेषगुणाश्रयत्वेन साधर्म्यम्। क्षित्युदकात्मनां चतुर्दशगुणवत्वेन चर्तुदशागुणाधिकरणत्वेन वा साधम्यम्[११]। पृथिव्यां रूपरसगन्धस्पशसख्यापरिमाणपृथकत्वसंयोग-विभागपरत्वापरत्वानि वेगाख्यसंस्कार नैमित्ति-कद्रव्यत्वं चेति पृथिव्याः गुणाः। स्पर्शसंख्यापरिमाणपृथकत्वसंयोगविभागपरत्वा-परत्वानिवे-गाख्यसंस्कार सासिद्धिकद्रवत्वं गुरुत्वं रूपं रसः स्नेह श्चैति चतुर्दशगुणा वारिणि वर्त्तन्ते।

भूतात्मनां वैशेषिकगुणवत्त्वम्। क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम्। आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम्। दिक्कालयोः पञ्चगुण-वत्त्वे सर्वोत्पत्तिमतां निमित्तकारण-त्वम् च। क्षितितेजसोनैमित्तिक-द्रवत्वयोगः। एवं सर्वत्र साधर्म्यविपर्ययाद्वैधर्म्यं च वाच्यमिति।

**पादटीका**

१.न्या.को १७६

२.स.द.कौ - पृ - ५९

३."प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानात्" निःश्रेया-साधिगमः।

४.प्र.पा.भा-पृ-२१

५.अस्तित्वं स्वरूपवत्वं षण्णानामपि साधर्म्यम्।
यस्य वस्तुनः यत् स्वरूपं तदेव तस्यास्तित्वम्। (न्या.क.पृ-१५)

६.ज्ञेयत्वं ज्ञानयोग्यता।

७.पारिमण्डल्य भिन्ननां कारणत्वमुदाहृदम् (का. व-१५)

८.तथा च समवायवृत्तिधर्मस्य जातित्वे एकव्यक्तिवृत्तित्वमेव बाधक-मिति भावः। सामान्यादिव्यवहारस्य निरुक्तोपाधेरेव सम्भवादित्येन तत्त्वम्।

९.प्र.पा.भा-पृ-९

१०.प्र.पा.भा. पृ-११

११.क्षित्युदकात्मनां चतुर्दशगुवत्वम् (प्र.पा.भा-पृ-१३)